नं: ५ - घ

काशिकावृत्ति व्याख्या
प्रथमोऽध्याय (खण्डितः)
पदमञ्जरी
पत्राणि ४२

(२)

नं० ५-घ

काशिकावृत्ति व्याख्या पदमञ्जरी

प्रथमोध्याय: खण्डित:


पत्राणि ८२

८२ पत्राणि

१
०/०

८

॥ रामेको॥ क्यच् इति क्यच्क्यङ्क्यषः इति। संज्ञान्तर्गत सम जेतस्य स्वरूप ग्रहणं न भवति। प्रयोजनाभावात्। न तावन्नम्येतत्र नलोपत्र नलोपः। प्रयोजनं
यदिपद त्वेऽप्रतिपदिकत्वात् तत्स्वंतमिसमुच्चयेत्वेवकिं पिविध्यर्थमेतन्न भवति नुक्तं ज्ञाप्यः सर्वे सुबंता द्विधीयन्त इति प्रत्ययलक्षणेन सिद्धं पदत्वं
नार्थमेतेन नत्राह सिद्धे सतीति। नांतमेवेति। अत एव नांतमिसिवं तु विपरीत नियमो न भवति न ङि संबुद्ध्योः इति निषेधात्। वाच्यतीति तत्र पदत्वा
भावान्कुत्व जश्त्वे न भवतः। पितुर्गोः मान्याः नां तादिवकज भवति तान्वेभ्य इत्याहुः ते षां क्यङ्क्यषो रेव नियम स्याव र्तेऽप्रदर्शनीयं न यस्तती
त्याहे॥ ॥ सितिच॥ ॥ भवदीयइति पदत्वाज्जश्त्वं ऊर्णायुः इति पदसंज्ञया निरस्तत्वात् यस्येति लोपाभावः। एवमत्विपरत्वेऽगुणो न भवति
वकारोनुक्तसमुच्चयार्थः। तेन भुवत् धारयतो मितो छेदसितत्वे मतुवर्थ इति भसंज्ञां बाधित्वा पदसंज्ञा भवति भुवद्वद्धः धारयवद्धाः॥ ॥ स्वादिषु
॥ नक्को॥ क्य इति क्यच् क्यङ्क्यषां ग्रहणं नांतं शब्दरूपं क्ये परतः पदसंज्ञं भवति। अवराजीयति। काइराजायते। अघवर्म्मा
यति वर्म्मीयति सिद्धे तस्मात् नियमार्थः। नांतमेव क्ये परतः पदसंज्ञं भवति नान्यत्। वाच्यतीति मुच्यति। ॥ सितिच॥ पधिमसिति
कृत्यतितत्साप्युपुरस्तादपकर्षः। सितिप्रत्यये परतः पूर्वं पदसंज्ञं भवति। भवतष्ठक्छसौ। भवदीयः। ऊर्णायाः युस् ऊर्णायुः ऋत्वोरण
छंद सिप्रसाकृत्वियः॥ ॥ स्वादिष्वसर्वनामस्थाने॥ स्वादिष्विति सुशब्दादेकवचनाद्यारभ्य ॥ २ ॥ ॥ ॥
॥ ॥ स्वादिष्विति सुशब्दादेकवचनादिति॥ सप्तमीबहुवचनात् आरभ्य ग्रहणं न भवति। असर्वनामस्थान इति निषेधात्। पदिहि राजश्चितर
माद्वौ सर्वनामस्थाने सुबंत इति भाष्यात्। हंत्राप्य निषेधो भीष्मः स्यात् तत्रैवा सर्वनाम स्थान इति ब्रूयात्। अथ राजन्वानित्याद्रौ न
तवीनिनिषेध इति चेत्। न। लुमत्यालुस्ते प्रत्ययलक्षणाभावात्। तसौमत्वर्थ इति पदसंज्ञाबाधनाय भसंज्ञा विधानाद्व॥ ॥
श्री रामचन्द्राय नमः॥ श्री राघवजी सहाय ॥ ॥ ॥ ॥ ॥



का॰प॰१॥ आकच इतिप इ पुनः सप्तमीबहुवचनपर्यन्ताः एकविंशतिः प्रत्ययाः । घोनेन हस्तिकन्य स्हाणामेव कुर्यात् । अनुवर्त्तिष्येऽहं । असर्वनामस्थान इति अनेन सं

बंधात् सप्तम्या विपरिणामात् सिद्धं किमर्थं पुनराकचः प्रत्ययाः गृहीता एवं तास्तु बंतत्र हि तो स्तिः समर्थोऽधिकारात् स्वार्थिका अपि स्युः बंतारे वास्व

कालत ने षितिलिंगात् । तत्र च स्तु राजन् राजते स्माद् ओ अंतर्वर्त्तिन्या विभक्त्या स्तु वंत पदं इ मित्येव सिद्धं । सत्यं भसंज्ञार्थं त्वाकचः प्रत्ययाः गृहीताः । एजत्वमि

त्यादिषु स्तु वंत त्वे पि पदत्वाद् अनेन पद इत्वं पुक् मित्येषामुपन्यासः । एजानौ एजाना इति । अत्र पदत्वात् नलोपाभावः । एजेमत्र तु अपलक्षणी न निषेधो

न भवति न ङिः संबुध्योः ए लिंगान्ने तल्लिंगामुपपद्यते । हे चर्म्मन् इति नपुंसके लुमता लुप्ते सर्वनामस्थाने निषेधानाव इह सेव पदत्वमिति तत्रार्थं

वान् प्रतिषेधः एवं तर्हि नार्थं प्रसज्यः प्रजेस्मम् प्रतिषेधः । सर्वनामस्थाने नेति किं तर्हि पर्युदासो मं । पदस्य सर्वनामस्थाना इति सर्व

आकचः प्रत्ययाः घं तो स्वादिषु प्रत्ययेषु परतः सर्वनामस्थानवर्जितेषु पूर्वं पदसंज्ञं भवति । एजाभ्यां एजभिः एजत्वं ।

एजता । एजतरः । एजतमः । असर्वनामस्थान इति किं । एजानौ एजानः ॥ १ ॥ ॥ ॥ ॥ ॥ ॥

नामस्थाने न विधिर्नमिति षेधः प्रदिकेन विभाषा प्रोति भवत्येव पूर्वं एव प्रा प्तोति । अथवा अनंत एषा भासि साप्रतिषिध्यते । कुत पुनरेत

त् अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा अथवा सर्वनामस्थान इत्यत्र पर्वी स पर्युदासः संबध्यते । तेन पदसंज्ञा हो पदसंज्ञा निषिध्यते । न हलाघ

विति एजेम्यादौ स्वादा विति वा हलुनितुं तं पदमिति वा भवत्येव । अथ कस्माच्छसा दिषु ति नोच्यते । एवं ह्य सर्वनामस्थान इति न वक्तव्यं भवति । उ

त्तरार्थं तु घपि न पुंसके भसंज्ञा प्रत्याख्यात ॥ नास्ती हलन्त्रामा भूत्समसंज्ञा विभाषा ङि श्यो ॥ ति वचनसामर्थ्याद् ईवीभसा पित्तल्लोपो भविष्यति

। तत्राप्यमप्ययं । प्रसेमाद् ओसां प्रति न वक्तव्यं भवति । अजत्वादेव सिद्धं इह तर्हि सुपदी ब्राह्मणकुलेर इति पदभावो न स्याद् भत्वात् स्वसा

मानिपक्षे ति नत्वा इहलोपः । सादि तियथाद्यासमेवास्तु ॥ २ ॥ ॥ ॥ ॥ ॥

१४३ यम॰

।यचिभं। पकारादारभ्य स्वादि। यस्मिन्विधिस्तदादावल्ग्रहणे इति नद्यादिविधिः ।।गार्ग्य इत्यादौ भत्वाद्यस्येति लोपः। नभोऽङ्गिरो मनुषां वत्युपसं
ख्यानमिति। इदं अप्येते उपसंख्यानेष्वद्धो विषये इत्याह ऊः। नभ इवेति। तृतीयासमर्थादिवेति विधानात् तत्तुल्यार्थोपदर्शनमेतत्। नभसा तु
ल्यं वर्त्तत इति विग्रहः पदनिबंधनकार्यनिवृत्त्यर्थमेव चैषां भसंज्ञा विधीयते। न तु भत्वनिमित्तं कार्यं यथा स्यादिति। असंभवात्। नभ
स्वद् गिरस्वदिति अत्रापदत्वाद्रुत्वाभावात् मनुष्वदिति अत्र पदत्वे रुत्वं स्यात् न तु षत्वं अपदान्तस्येति वचनात्। वृषण्वसुः वृषणश्वः इति प

॥यचिभं॥ स्वादिष्वसर्वनामस्थान इति वर्त्तते। सर्वेणैव पदसंज्ञायां प्राप्तायां तदपवादोऽयं भसंज्ञा विधीयते। यकारादावजादौ च स्वादावसर्वनाम
स्थानवर्जिते प्रत्यये परतः पूर्वं भसंज्ञं भवति। यकारादौ। गार्ग्यः वात्स्यः। अजादौ। दाक्षिः प्लाक्षिः। नभोऽङ्गिरोमनुषां वत्युपसं
ख्यानं। नभस्वत् नभस्वत्। अंगिरस्वत् अंगिरस्वत्। मनुष्वत् मनुष्वत्। वृषण्वस्वश्वयोः। वृषन्निति नकारान्तस्य वस्वश्वयोः परतो भसंज्ञं भवति
वृषण्वसुः। वृषणश्वः। भप्रदेशाः भस्येत्येवमादयः॥ ॥तसौ मत्वर्थे॥ भमिति वर्त्तते। तकारान्तं सकारान्तं च शब्दरूपं मत्वर्थे प्र
त्यये परतो भसंज्ञं भवति। उदश्वित्वान् तद्घोषः। विद्युत्वान् बलाहकः। सकारान्तं। पयस्वी ॥ ॥ ॥ ॥

इत्येतत्पदान्तस्येति षेधाण्णत्वं न स्यात् नलोपश्च स्यात्॥ भत्वे पदलोपो न भवति। अनंगत्वात्। तसौ। मत्वर्थीयेनाहितसामान्याः प्रकृतेः
तकारसकाराभ्यां विशेषणेन तदंतविधिरित्याह। तकारांतमिति। मत्वर्थे प्रत्यये परत इत्यधिकारोऽयं समस्तेतनो र्थो [illegible] वर्ण्यः। तत्र प्रत्य
यो वर्त्तते तस्मिन्नित्यर्थः। अथवा समाधिकारेण मनुशब्देन साहचर्यात् तद्धितोत्पत्त्यर्थे मनुरर्थोपलक्षितस्मिन्नित्यर्थः। उदश्वित्वानिति
भत्वात् सदलाभावेन त्वं न भवति इह परं इति वत्वं उदकेन श्वेनश्वपतिवर्द्धते। उदश्वित्। किं पिउदश्विनो मत एस्यामिति निपातनात्। संप्र
सारणाभावः। संज्ञायामुदभावः। ॥ ॥ ॥

पयस्वीति। अस्मायामेधास्रजो विनिः। मत्वादुत्वाभावः। अर्थग्रहणं किमर्थं न मतावित्युच्येत स्वादिष्वितिवर्त्तते अधिकारणोऽसत्स्मो। मतोऽर्थेत्वाद्यपः
।कथं पुनः शब्देन मशब्दो वर्त्तते। असंभवाद्दृष्टेन निवृत्तास्यते यथैवं लभ्येत क्रं स्यात तत्तु न लभ्यं न हि सामान्याधिकरण्ये संभवतीत्येवमधि
करणं यथार्कं विज्ञातुं। तत्र स्वमतावेव स्वाद्दो स्यात पयस्वान्यशस्वानिति रुत्वं तु न स्यात। पयस्वी यशस्वीति। अतोऽर्थग्रहणं कर्त्तव्यं यथ
पिग्रहणं क्रियते मतुपि नमप्रोतितत्स्वार्थविशेषणत्वात्। सत्येऽर्थविशेषणं मतुप्विशेष्याकारेऽपि तत्रास्ति अस्मास्य स्त्रिनितिचम
महत्योऽर्थः सच विन्मादीनामिव मतुपोऽयं विशिष्टः यथा देवदत्तशालायामासीज्यास्त्राणा आनीयंतामिति उक्ते विशेषणभूतोऽपि देवदत्तः

पयस्वीति। तसाविति किं। तक्षवान्ग्रामः॥ ॥ अयस्मयादीनि छंदसि। अयस्मयादीनि शब्दरूपाणि छंदसि विषये साधूनि भवंति।
भपदसंज्ञाधिकारे विधानात्तेन मुखेन साधुत्वमयस्मयादीनां विधीयते। अयस्मयं चर्म्म। अयस्मया नि पात्राणि। क्वचि
दुभयमपि भवति। स सुष्टुभा स ऋक्वता गणेन। पदत्वात्कुत्वं। भत्वात्तज्वसेन भवति। छंदसीति किं। अयोमयं वर्म्म॥१०॥

सति ब्राह्मणे आनीयते यत्र तु पलस्याकारस्यासंभवः तत्रैवोपलक्षणस्य पर्यायो॥ तद्यथा चित्रगुरानीयतामिति न हि चित्रगवीनां चित्रा
गावः संति। अयस्मया पदसंज्ञा विधीयेत आनंतर्याद्भसंज्ञा विधीयेत आनंतर्याद्भसंज्ञाविधानद्वारेणैव निपातनं स्यात न पदसंज्ञा
न स्यात नाम पदसंज्ञायाः समावेशो न स्यात ततस्मात्साकं तमेव युक्तं विधातुमिति मत्वाह। अयस्मयादीनीत्यादि। साधुत्वे प्रकारविशे
षं दर्शयति। भपदसंज्ञाधिकारे इत्यादि। ह्यस्मुणयः। अयस्मयं इति अयस्मयं इति अमसोविकारः। द्व्यचश्छंदसीति मयट्॥१०॥

। बहुषु बहुवचनं विहितमिति। ननु तत एव विधेयविभक्तिनिर्दिष्टस्यापि प्राधान्यत्वादनुवाद्यत्वेननु विधेयत्वमिति भावः। बहुत्वसंख्यानुसृतविभक्तिनिर्दि
ष्टापि अप्राधान्याद्विधीयत इत्याह। तस्मान्नेनेति। इदं वा पदमनेन नग्ने येन दर्शितं। स्वादिविधिवाक्येन भिन्नमतत्वाभ्यां तत्रापि विधार्थ्येन नियमा
र्थमिति। यदाह बहुवचनं विहितमिति। बहुत्वसंख्यावाच्यत्वेन विधीयत इति वा। यदि पुनरेकवाक्यतया विशिष्टविधिः स्यात्तदा तरेत एव प्राप्नोति
विहितः नो तस्मादौ नो बहुवचनसंस्कृतपाद विधानमिति। किं वा येभ्यो निः सांख्येभ्यः स्वादयो न स्युः अतो भिन्नवाक्यत्वमेव युक्तं तत्रापि विधय
र्थ। इह केचिन्मन्यन्ते। स्वार्थद्रव्यलिङ्गसंख्याकर्माद्यात्मकः प्रातिपदिकार्थ इति। आदितः त्रिक इत्यन्ये। तत्र शब्दप्रवृत्तिनिमित्तं स्वार्थः। स चा
नेकप्रकारः। स चानेकप्रकारः स्वरूपं जातिर्गुणः क्रिया द्रव्यं संबन्धश्चेति। डित्थो गौः शुक्लः पाचकः पचिः पुनरर्थं दण्डीति जात्यादिष्वपि
जात्यादिमात्रनिष्ठेषु स्वरूपमेव प्रवृत्तिनिमित्तं अभिधानाभिधेयपोर्भेदाध्यासात् शब्दस्वरूपानुरक्तौ मिधीयते अस्यार्थ इति नाम अप्रयोगे

॥ बहुषु बहुवचनं॥ प्राक्प्रातिपदिकात्स्वादयः लस्य तिबादय इति सामान्येन बहुवचनं विहितं॥ ॥ ॥

इति वयं प्रतीति विशेषोऽभिधेयं स्वरूप अत्र हेतुर्वैयधिकरण्यं सामानाधिकरण्यं च। तत्र जात्यादिवित्स्वरूपमपि शब्दत एव प्रतिपन्नमर्थ
स्य विशेषणं मन्यन्ते। उक्तं च आद्यन्तं श्राह कत्वं च देशक्तौ तेज सोपपद्यात एवं सर्वशब्दानामेते पृथगवस्थिते इति नैव स्वरूपमपि ह्य
र्थ युज्यते शब्दस्य पत्र विश्रान्ति र्वाच्यं द्रव्यं तदिष्यते। पर्यनमानभूमि विमर्शः। स चानेकप्रकारं जातिर्गुणः क्रिया द्रव्यं स्वरूपमिति गौः
शुक्लः पाचको डित्थः तूष्णीमिभूयरति। लिङ्गं स्त्रीत्वादि संख्या एकत्वादि कर्मादि कर्मादयो वक्ष्यमाणाः कारकविशेषाः। नहि द्वितीयं द
र्शनं शक्तिकारेण श्रितं। अन्वयव्यतिरेकाभ्यां हि शब्दार्थनिश्चयः। यस्मात् शब्दस्यान्वये योऽर्थः प्रतीयते तदन्वये तद्व्यतिरेके व्यतिरिच्यते स तस्या
र्थः। वृक्षः वृक्षौ वृक्षाः इत्यादौ च तत्र द्वचनाच्ये सामान्यतः प्रतीयते व्यतिरेके च व्यतिरिच्यते सत्त्व पिण्ड कारकं च येतेनमस्यामहे वचनार्थः
संख्येति॥ ए म ए म ए म ए ॥ ॥ ॥

तथा ह्युक्तं वृत्तेणाहस्यपेमाद्यो तत्तत्रिकान्वयेस्य कर्म्मादिः प्रतीयते। व्यक्तिके चव्यतिरिच्यते तेन न मन्यामहे त्रिकार्थः कर्मादिति। यद्यपि च पयो
दधि मधिमाद्यावन्तरेणाव वचनमन्तरेण त्रिकं सोर्थः प्रतीयते। नैतावता विभक्त्यर्थत्वं हीयते न हि पवनेन हिमादिमन्तरेणापि तिङः कृत्तस्यिं
ख्या च प्रतीयते तथापि नैतावता सर्वत्र प्रकृत्यर्थत्वं युक्तं न हि भिदृच्छिदिमादौ अन्तरेणापि प्रत्ययं कर्त्ता प्रतीयत इति भेत्तेमादावपि कर्त्ता प्रकृ
त्यर्थो भवति। तदेवं त्रिक एव प्रातिपदिकार्थः। धातोस्तु किं पेयवाक्येति अस्त्यस्मा लिङ्गमि इष्टार्थत्वात्तस्यार्थे किं क एव ज्ञमादि बहुवचनस्या
तन बहुत्वस्य ग्रहणं तं संख्यावाच्यत्वेन विधीयते। सूत्रेष्वन्तरेणापि भावप्रत्ययं भावप्रधानो निर्देशः। बहुत्वमर्थः। आक्षेपात्तस्य बहु
त्वस्य गुणे आरोपात् बहुष्विति बहुवचनं। आरोपस्य प्रयोजनं ताद्धर्म्यात् संख्यानूपस्य बहुत्वस्य ग्रहणं यथा स्यादनन्ते नैकार्थेपि वै पुंस्त्व

न स्यादनेन बहुत्वसंख्यावाच्यत्वेन विधीयते। बहुषु बहुवचनं भवति बहुत्वमस्य वाच्यं भवतीति यावत्। कर्म्मादयोऽप्यपरे
विभक्तीनामर्था वाच्यास्तदीये बहुत्वे बहुवचनं। कर्म्मादिषु बहुवचनमित्यर्थमपरे लक्षणाः पठन्ति॥ ॥११॥ ॥

हुवचनस्य वाच्यं न भवति। बहुरोदन इति केचित् मन्यन्ते संख्या कर्मादयस्तु परास्य समन्विताः प्रकृत्यर्थेन वान्विता विभक्तिरेभिधीयते।
त्वान्न प्रश्नकोर्थः। वृक्षा बहवो वृक्षाः कर्म्मेति ननु कर्मभूता वृक्षा बहव इति नापि बहवः कर्म्मेति एवं एकवचनेपि पशुना
यजेतेति पशुरेकः पशुः करणमित्यर्थः। तत्तु करणीभूतः पशुरेक इति नाप्येकः पशुः करणमिति। कारणत्वैकत्वयोर्युगपदभिधानादिति
तान्विशेषकरीति कर्म्मादिपरत्वादि। तदीये बहुत्व इति कर्मादिगतमेव बहुत्वं बहुवचनस्य वाच्यं न तु केवलप्रातिपदिकार्थगतमित्यर्थः। प्रकृ
त्यर्थगतमेव बहुत्वं वाच्यं वृक्षशब्दस्याव पर्यायवाच्यो न त्वेव पदार्थ इति द्रव्यपदार्थपक्षे तावत् रक्षपस्येति मूलस्कन्धफलपलाशादीनां बहुत्वेपि
तेषामनभिधेयत्वाद्बहुवचनाभावः आकृतिपक्षोपपन्नस्य सत्त्वे तदाधारगतं बहुत्वमाश्रीयते॥ ॥११॥ ॥ ॥

।नत्वबहुषु व्याप्तं भिन्नवाक्यतया विधिरित्युक्तं प्रयोजनमाह यत्र वेत्यादि। भाष्ये तु पंचकपक्षो गीकारेण नियमपक्ष एव स्थापितः तत्र ह्यनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे इति स्वार्थेपि प्रसक्ते द्विवचनं बहुत्वेपि इति च। तस्मात् अपि स्वार्थता। तत्राप्ययं नियमः। बहुषु बहुवचनमेव द्व्येकयोर्द्विवचनैकवचने एव वेति स्वं कर्म्मणि द्वितीयेत्यादावपि कर्म्मणि द्वितीयैवेति एवमादिकोर्थनियमो वेदितव्यः। एवं हि प्रत्यया नाम नियतार्थाः संख्याभ्योति कारके प्रत्यये प्यस्वार्थ्यः सिध्यति। अथवा अस्य यनियमः। बहुष्वेव बहुवचनं द्व्येकयोरेव द्विवचनैकवचने तुल्यजातीयस्य च नियमे न त्वाह इति बहुष्वेव बहुवचनेन द्व्येकयोः एकस्मिन्नेवैकवचनं न संख्यान्तरे द्वयोरेव द्विवचनं न संख्यान्तरे इति स्वं कर्म्मण्येव द्वितीया न कारकान्तरे इति एवमपि प्रत्ययेभ्यः स्वार्थः सिध्यति। द्व्येकयोः। द्विशब्देन साहचर्यादेकशब्दः संख्यावाची। अयमपि भावप्रधानो निर्देशः। अत एव द्व्येकयोरिति द्विवचनं

॥यत्र च संख्या संभवति तत्रायमुपदेशः। अथ येभ्यः कृत्तिः संख्येभ्यः सामान्यविहिताः स्वादयो विधीयन्त एव॥ ॥द्व्येकयोर्द्विवचनैकवचने॥ ॥द्वित्वैकत्वयोरर्थयोर्द्विवचनैकवचने भवतः। एतदपि सामान्यविहितयोर्द्विवचनैकवचनयोरर्थाभिधानं। द्वित्वे द्विवचनं भवति। एकत्वे एकवचनं भवति। ब्राह्मणौ पचतः। ब्राह्मणः पचति॥ ॥कारके॥ कारक इति विशेषणमपादानादिसंज्ञाविषयमधिक्रियते। कारकग्रहणमधिकारो वेदितव्यः। यदित ऊर्ध्वमनुक्रमिष्यामः कारक इत्येवं तद्वेदितव्यं॥१२॥ ॥ ॥

तदाह द्वित्वैकत्वयोरिति एतदमीत्यादिना अस्यापि विधयस्तं दर्शयति। कथं तर्हि सामान्यविहितयोरिति वचनं यावता नियमार्थत्वे एतद्भवति उच्यते साधारणमयमपि सामान्यशब्दः स तं संख्याभिः संख्यासाधारण्येन विहितयोरित्यर्थः। अर्थाभिधानमिति। अर्थो वाच्योभिधीयते कथ्यते येन तदर्थाभिधानं द्व्येकयोरित्यत्र संख्याया अल्पीयस्त्वादेकशब्दस्य पूर्वनिपातो स्मादेव निपातनान्न भवति। संख्येयवचने त्वेवापि द्व्यल्पकमल्पीयस्त्वमित्यस्य॥ ॥कारके अधिकारोनेकप्रकारः संज्ञाविशेषणं स्थानी प्रकृतिर्निमित्तमादेश इति यथा यः शेषे पूर्वपदयोः धातोरार्द्धधातुके इत्यादिः। तदिह विधेयानिर्देशात् स्वरितत्वाद्वाधिकारोऽस्तीति प्रकारमाह कारक इति विशेषणं अधिक्रियत इति तावत्संज्ञात्वेनाधिकारसंज्ञाया भावमनत्वात् सम्यगनुपपत्तेः॥ ॥

का०प०१२ १४६

अथ संज्ञानुरूपः प्रथमानिर्देश एव कस्मान्न कृतः पुंस्त्वे चैतत्कारकसंज्ञाद्वन्द्वेषु वक्ष्यमाणानामपादानादीनामनेन ग्रहणे सिद्धत्वात् अन्यथा नरसम्प्र
योगीतिकारकशेषस्यापि प्रसंगात्। उच्यते। संज्ञापक्षे अपायापेक्षत्वं कारकत्वं भवति अपादानं संज्ञं त्वेतत्पयमर्थे भवति। एवमन्यत्रा
पि तत्र कारकापादानसंज्ञयोर्युगपद्विधानात् परस्परं निमित्तनिमित्तिभावात् कारकस्यापि ध्यापायसूत्रस्यापादानसंज्ञा प्राप्नोति वि
शेषणाधिकारे तु कारकेषु मध्ये अपायापेक्षत्वं कारकमित्यर्थो लभ्यते निर्द्धारणे सजातीयविषयत्वादिति ध्यापायसूत्रस्य न प्राप्नोति
। अतो विशेषणानुरूप एव निर्देशः। ननु संज्ञानुरूपः। कारकसंज्ञानु अन्वर्थत्वात् ध्यापायसूत्रस्य न प्राप्नोति। अतो विशेषणानुरूप एव
निर्देशः। ननु संज्ञानुरूपः। कारकसंज्ञानु अन्वर्थत्वात् ध्यापायसूत्रस्य न भवति किंच कारकसंज्ञानु अन्वर्थत्वात् ध्यापायसूत्रस्य न भवति किं
च कारकसंज्ञाया अपादानादिसंज्ञाभिः समावेशो न प्राप्नोति तत्र संज्ञे परस्मिन्न सम्भवाच्छ्रूयमाणायां तिकारकोपपदापि तिस्रोपेन स्यात्।
कारक इति निर्धारणे समीहामात्रापेक्षत्वेन कवचनं कारकशब्दोपमन्तिरएवलंतः करोतीति कारकमिति। अत्रत्वस्मन्मते संज्ञाशब्दो निमित्तप
र्यायः तत्र सर्वस्य ग्रहणे अपादानादिषु कारकशब्दो न प्रवर्त्तेत यथा कर्तृशब्दः। तेषामस्वतन्त्रत्वात् स्वतन्त्रस्यैवापत्तेः कर्तृसंज्ञाप्रसज्येत। नैषदोषः
र्वमेव खलु कारकेषु यथायथं अवान्तरव्यापारान् निर्वर्त्तयत्सु प्रधानक्रियायां उपयुज्यते। सकलकारकजन्या फलभूता विक्लित्यादिरूपक्रिया प्रधान
क्रियापदवाच्या सामान्यभूता क्रिया प्रधाना क्रियायद्वाच्या सामान्यभूता क्रिया प्रधाना क्रियायाः फलजनना नाम सर्वाणि हि कारकाणि फलजननाय प्र
वर्तन्तेऽतो अतीपयफलजननारूपं तत्सर्वेष्वेव कारकेषु अविशिष्टं किंचित्खलु कारकं केनचित् खलु कारकं केनचिद्रूपेण फलं जनयतीति फल
जनना सर्वेषामभिन्नरूपा अवान्तरभेदविवक्षायां तु करणादिरूपोऽन्येषुः। न च वैशेषिकाणामिवास्माकमेका क्रिया नामैकत्र समवेता धात्व
र्थो हि क्रिया नपरिस्पन्दरूपा धात्वनुभाव्यस्तकलकारकानुपाय्योर्नादिफलावच्छेदेन एकीकृतो व्यापारोऽभिधीयते। तस्यामेकस्यां प्रधानक्रिया
यामुपयोऽपयायथमवान्तरव्यापारमुखेन। तथाथात्रापादानस्यावधिभावो यामनंगपायः संप्रदानस्य प्रेरणानुमननादि निराकरणं नि
करणस्य काष्ठादेर्ज्वलनादि। अधिकरणस्य संभवनधारणादिः। कर्म्मणो निर्वृत्त्यादिः। कर्तुः असिद्धरूपवाप्रयोजकस्य प्रेरणादि। नचैवं सति करणादी

१४६

।पथेवं कारकव्यपदेशोपि करणाद्यवस्थायां न स्यात् करणं कारकमिति अधिकारः सम्पत्तिः। कारकशब्दोपनीतं स्वातंत्र्यमवस्थात।। त विज्ञास्यते। अवस्थांतरे मतस्य तंत्रं तत्साधकतमं करणमिति कर्तुरेव नैकस्मात् प्रतिकं स्वातंत्र्यं तत्र कर्तृसंज्ञा।। ततः पाचो दिशो प दितं हि मुसलनिपतनेवस्थांतर।। तमेवस्था तं प्रत्येवं तर्हि करणाद्यवस्थायां निमित्तभावस्यानुपपत्तेर्भवति पथेवं कं दोषः प्रतिविधानमस्मिन् निमित्तपर्यायस्य ग्रहणमस्तीति मन्यमान आह कारकशब्दश्चेति। कस्य हेतुरिति सम्बन्धविषयोपि हेतुः कारकं स्यादिति अभिप्रायः।

॥ कारकशब्दश्च निमित्तपर्यायः कारकं हेतुरित्यनर्थान्तरम्। कस्य हेतुः। क्रियायाः। कक्षप्रतिकृतमपायेष्वपादानं। ग्रामादागच्छति। पर्वतादवरोहति। कारक इति किं। वृक्षस्य पर्णं पतति। कुड्यस्य मित्रः पतति। अकथितं च। अकथितं च कारकं कर्मसंज्ञं भवति। माणवकं पन्थानं पृच्छति। कारक इति किं। माणवकस्य पितरं पन्थानं पृच्छति। कारकसंशब्दनेषु वाने नैव विशेषणेन व्यवहारो विज्ञायते॥१३॥

कारकशब्दोयं क्रियाहेतावेव प्रसिद्धः। तस्मात् क्रियाया इति। अनाश्रितव्यापारं निमित्तं हेतुः आश्रितव्यापारं कारकं उक्तं च द्रव्यादिविषयो हेतुः कारकं नियतक्रियमिति। अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते इति च। कथं न हि सर्वमुक्तं अनर्थान्तरमिति। न हि सामान्यविशेषवचनानामनर्थान्तरत्वाभावितं हेतुः सामान्यशब्दोपि अपि सामर्थ्यात् करणादिना विशेषेण नियमं प्रयोक्तव्यम्॥ श्रीरामचन्द्राय नमः॥ ॥ श्रीकृष्णार्पणं॥ ॥ ॥ ॥

का॰ प॰ ६॰ १३
१४७

वृक्षस्य पर्णं पतततीति पर्णविशेषणत्वेनात्र वृक्षो विवक्षितो न त्वपायस्य निमित्तत्वेनेत्यपादानसंज्ञा न भवति नयापस्यापि विवक्षितत्वात् ।
सति सम्बन्धे षष्ठीति न्यायो भवति। नाप्यपादानत्वात्र वृक्षो वाधित्वेन विवक्षितः। तथाहि वृक्षमजहत्यपि पर्णे वृक्षस्य पर्णं पततीति भवति।
भयोगात्र महावृक्षः छिन्नः पततीति। तमं अत एवास्मिन्नमः सन्नाहा माणवकस्य पितरमिति अत्र पितुः संबंधित्वेन माणवको विव
क्षितः न सम्प्रक्रियांप्रति निमित्तत्वेनेति कर्मसंज्ञा न भवति। अस्तु तु कारकाधिकारे तस्यापि स्यात् शेषलक्षणा तु षष्ठी अक
थितेषु स्वादिषु गणनाच्छातः पुरुष इत्यादौ सावकाश्याप्युक्तं हि विशेषणमिदं क्रवादीनां न संज्ञा कारका इत्यत्र भूतमो रेवाधिपीसा
दीपकारकशब्दः संशब्द्यते तत्रापादानादीनां वृक्षमाणानां षणामेव ग्रहणमित्यतेन तत्र सिद्धत्ति संज्ञापत्तेनु न दोषः संज्ञा
वर्तमाना सेतिनं प्रसत्यापपत्ति। स्यादेतत्तत् मदेशोषपि क्रिया निमित्तपर्यायस्य कारकत्वसोपादानेत्वनिमित्तमपादानं नि
येवेति तत्र हतरसम्प्रणोनीसादौ कारकशेषस्य संभवादिति अत आह कारकसंशब्दनेषु वेतिकारकग्रहणं प्रदेशेषु सर्वत्र
स्यात्ते नाधिकारएव गतिर्भवतीति भावः॥ १३॥

१४७

राम॰

॥ध्रुवं॥ ध्रुवमिति ध्रु गतिस्थैर्ययोरिति तस्मात्कुटादेः पचाद्यचि कृतरूपं अपायेतु ध्रुवस्थैर्ये इति पठन्ति। तेषामिगुपधलक्षणः कप्रत्ययः। अपायो विश्लेषो
विभागस्तद्धेतुभूतश्च गतिविशेषो वधिरपेक्षः तत्र विभागस्य द्विष्ठत्वात् न केवलमपयन्नेव तेन युक्तः। किं तर्हि यतोपैति सोपि युक्त एवेत्याह
।ध्रुवं पदं पायपुक्तमिति। कथं पुनः स्वस्मीनिर्दिष्टो व्यपायमयुक्तमितिभ्रमितिपर्यं महीतत्राह अपायेसाध्य इति। साध्य इति। साध्यत्वेन विषयत्वान्
सामार्थ्यलक्ष्याम्भोयोग इति भावः। ध्रुवमित्येकरूपमुच्यते ध्रुवमसमृद्धमिति इह तद्व्यपायेन विशेष्यते अपायेपर। ध्रुवमिति ननु सावधिकमि
तितत्वापाये ध्रुवं उच्यते पदं स्यपेनना विश्यते उपयुज्यते धापाथे तत्त्वापाये ध्रुवधिभूतमिति आह परस्वधिभूतमिति। एवं तसार्थान् हीनो ध्या
सजितिः धावतः पतितस्य तस्मादौ तत्तपि क्रिमोत्तरावेशात्चलत्वेतन्न द्वानादिक्रियानावेशात्तन्निमित्तमपायं प्रत्यौदासीन्यादस्त्येव ध्रुवत्वमितिभ

॥ध्रुवमपायेऽपादानं॥ ॥ध्रुवं पदं स्यापयुक्तं अपाये साध्ये यदवधिभूतं तत्कारकं अपादानसंज्ञं भवति। ग्रामादागच्छति।
पर्वतादवरोहति॥ सार्थाद्धीनो॥ रथात्पतितः॥ ॥ श्रीएमवद्धायानमः ॥ ॥ ॥ ॥ ॥

वमेवसंज्ञा। उक्तं च अपायेपदुदासीनं चलं वा यदि वाचलं। ध्रुवमेवातदावेशात्तदपादानमुच्यते इति। पततः पतितस्तस्याप्यपरमत्याता
पेक्षमाश्रौव्यमेव तथा हि पततो ध्रुव एवाश्वो पृष्ठादश्वात्पततामाहो। तस्मात्श्वस्य पतने कुड्यादि ध्रुवमुच्यते। इहतु परस्परस्मान्मेषा
वपसर्पत इति मेषयोः तर क्रियापेक्षमवधित्वं पृथक् पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्। इति द्विना तवधिना नोपाप
इति कथ्यते तु गुरुक्षेति तत्संश्लेषपूर्वके। विश्लेषो पापः एचान्तरानाति बुद्धिपरिकल्पितत्वको गौणः न च मुख्योस्तं भवति। गौणस्य ग्रहणं पुक्तं।
अत एव भीत्रार्थानामित्यादेरणं भइतिवाक्यकारणाभिप्रायः। अन्न वका कुक्षौ एवत्वात् तषष्ठी माभूदिति नरस्त्वम्पाणो तीयष्याप्रत्याख्यानं तस्य सा
धकतममितितमग्रहणे लिंगांका। कस्मकारणे पश्यात् भवमेव साधकतममिति ॥ ॥

का॰ ११-१२ तदिहाधर्माज्जुगुप्सत इत्यादौ जुगुप्सादिः परिवर्जिकायां निरस्तो जुगुप्सादीनां हन्ति। इति स्थिते य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखहेतु
१५८ रयमधर्मो नैनं करिष्यामीति स बुद्ध्या तं प्राप्नोति मा प्रवर्त्तत ततो निवर्त्तते धर्मात्प्रमाद्यति धर्मो न्नुद्यतीति। य एष नास्तिकः पुरुषः स पश्यति ना
नेन धर्मेण किंचित्साध्यते नैनं करिष्यामीति स बुद्ध्या तं प्राप्नोति मा प्रवर्त्तत ततो निवर्त्तते तत्र ध्रुवमपायः समेत्य सिद्धमिति। तच्चोक्तम्। निर्दिष्टविषयं
किंचिदुपात्तविषयं तथा। अपेक्षितक्रियं चेति त्रिधापादानमुच्यते। यत्र धातुनापायलक्षणः संज्ञाविषयो निर्दिश्यते। यथा ग्रामादागच्छती
ति तन्निर्दिष्टविषयं यत्र धातुर्धात्वन्तरार्थाङ्गत्वार्थमाह यथा वलाहकाद्विद्योतते विद्युदिति। अत्र हि निःसरणाङ्गविद्योतने विद्यु
न्निर्वर्त्तते। वलाहकान्निःसृत्य विद्योतत इत्येवं कुसूलात्पचतीत्यत्रादानाङ्गे पाके पचिर्वर्त्तते कुसूलादादाय पचतीति तदुपात्तविषयं अपे

जुगुप्साविरामप्रमादार्थानामुपसंख्यानं। अधर्माज्जुगुप्सते। अधर्माद्विरमति। धर्मात्प्रमाद्यति। अपादानप्रदेशाः अपादानेपं
ध्रुवमीत्येवमादयः॥ ॥१४॥ ॥ ॥

क्षितक्रियं तु यत्र क्रिया न श्रूयते प्रमाणान्तरेणानुप्रतीयते यथा सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इति। सोपितदेवमत्र सिद्धमा
गमनुपजीव्याह पाटलिपुत्रादिति ध्रुवग्रहणं किमर्थमागाच्छतीति शकटेन अत्र शकटस्य मा भूत् अध्रुवे क्रियमाणेऽपि ध्रुवग्रहणे इहक
स्मान्न भवति धावतोऽश्वात्पतितीति अत्र हि शकटापायं प्रति अवधिभावे नैव ध्रुवः साधकतमत्वात्करणसंज्ञा
भविष्यतीत्येवमक्रियमाणेऽपि शकटस्यैव भविष्यति। एवं तर्हि संज्ञान्तरविषये सर्वत्र स्तस्य पतन्तं पततीत्यत्र तु अपायस्याविवक्षितत्वाद्यका एक
स्मान्न भविष्यति संज्ञेति निर्देशार्थं तु नहि कारक इति सत्संज्ञे तेन शाकं संज्ञे निर्दिष्टं सिद्धं तु निर्दिश्यमानसंज्ञानिवृत्त्यर्थं विषये युक्ताकेषु १५८
न ध्येयकारकं संज्ञान्तरे सा विषयप्रदाना मिति तदेवं ध्रुवग्रहणं चित्प्रयोजनं॥ १५॥ ॥ ॥ ॥ ६०

।।भीत्रार्थानां भयं भीः त्राणं त्राः तत्पदादिवास्त्रवीकिप् । भीत्रौ अर्थौ येषां ते भीत्रार्थाः षष्ठी प्रयोगापेक्षया कारकापेक्षा वेत्याह विभेत्यर्था
नामित्यादि । अत्र बिभेतित्रायतिशब्दौ तदर्थपरौ वर्त्तेते तदर्थापेक्षा भिन्नार्थत्वे । त्राणं बाधकेभ्यो रक्षणं बाधकाश्च भयहेतव इति त्रार्थानामपि भ
यहेतुः कारकं भवत्येव । चौरेभ्य इति चौरा एते भयबाधकाश्चौराः । क्वचित्त्रायतेरित्यपि पाठः तत्र सामर्थ्यकिं अपत्यापरिच्छत्रादिषु वा चुरादावदन्ताः पठ्यन्ते सर्वाः
भयमपादित्सया पासंश्लेषी पुजि तिषु विवाधके भामेन तस्मादेव नियातना दका प्रत्ययो लुकि च युक्तसाधते ततश्चुराः शील अस्येति रोरु
ते सर्वार्थो भवति बिभेतीति । निर्भीमयेन्तु हेत्वादि । उद्विजत इति विजी भयसंचलनयोः । तौदादिको नुदात्तेत् । आ एष रत्नत स्तेभ्यो ल्काहि

।।भीत्रार्थानां भयहेतुः।। बिभेत्यर्थानां त्रायत्यर्थानां च धातूनां प्रयोगे भयहेतुर्यत्तत्कारकमपादानसंज्ञं भवति । चौरेभ्यो बिभे
ति । चौरेभ्य उद्विजते । त्रायत्यर्थानां । चौरेभ्यस्त्रायते । चौरेभ्यो रक्षति । भयहेतुरिति किं । अरण्ये त्रायते ॥ ॥ ॥ ॥

भ्यो भयं नारण्यात् । ननु च ध्रुवमित्यनुवर्त्तिष्यते न चारण्यमवधित्वेन विवक्षितं परत्वादधिकरणसंज्ञैव भविष्यति । सत्यं सर्वस्यैवापंच
पंचकः कथं भयादिहेतुविकायां निवृत्तौ भ्यादयो वर्त्तन्ते । विभेतीति कोर्थः । भीतो निवर्त्तत इत्यर्थः । त्रायत इति कोर्थः । चोरेभ्यो नाहृधाता
हेतूनां निवर्त्तयतीत्यर्थः । कथं तर्हि चौरमध्यवर्तिनि चौरेभ्यो बिभेतीति भयो गाः नत्मन्न निवर्त्ति रक्षितं अत्रापि भीत्या निवर्त्तितुमि
च्छतीत्यर्थो द्रष्टव्यः । तदेवं बुद्धिपरिकल्पितोपायमेषां सुधान्त्र विषयमिदमपादानमिति कृत्वा एवं योगोऽयं प्रपंचोऽस्ति किमर्थं प्रपंचेनु
योगेन ॥ श्रीरामजीवसहाय ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥ ॥ ॥

का·प·६०१२
१४९

पराजेः। अत्र धातुपाठात्तस्य जीत्येतावन्मात्रस्यानुकरणं। ततः परा इत्यनेनाजिः पराजि इत्युत्तरपदलोपी समासः। ननु प्रकृतिवदनुकरणं भवतीत्यधा
तुरितिप्रातिपदिकसंज्ञायाः प्रतिषेधादलुवंतमात्रसमासो न प्राप्नोतीति नाप्रतिषेधात्। नायं प्रसज्यप्रतिषेधः धातोर्नेति किं तर्हि पर्युदासो यं य
दन्यत् धातोरिति धातोर्न विधिर्न निषेधः एवमप्यायत्तदेशः प्राप्नोति पराजेश्छि इति निगुणो भविष्यतीति समुदायस्य वा समुदायो नुकरणं
कस्य समुदायस्य पयोः एवं अघ्यमभात पराजयते अत्र न प्राप्नोति न ह्यत्र पराजीति रूपमस्ति कृतं हि स्यात्। यत्र पराजिरूपमस्ति अध्या
यन्यात्पराजितः इति उदाहरणे पराजिर्न्नीभावे वर्त्तते। अध्येतुं क्लसतिग्लापतीत्यर्थः। अकर्मकश्चायमत्रार्थे तत्र यस्मात् प्राप्यांवचनं प्रत्युदाह
रणे त्वभिभवे वर्त्तते। विपराभ्यां जे रिमत्रार्थ इष्यते तस्मान्नस्य ग्रहणं। अपममपि सर्वं वः न्यूनीभाव पूर्वकं मानिरतोर ततो सिद्धं अध्ययनात्परा
जयते कोर्थः न्यूनी भावेन ग्लान्यातो निवर्त्तत इत्यर्थः। तेन प्रत्युदाहरणे परत्वात्कर्मसंज्ञा न विप्रतीति न चोदनीयं। वारणार्थेपितथा द्रोपमभ्य
भिप्रेत पर्यायः। अस्ति च क्रियाशब्दः आप्तुमिष्टमीप्सितमिति तत्र सूर्वग्रहणे यवानामाप्तीप्सितत्वं गावां च परकीयत्वं एवं स्यात्। न विपर्ययेन स
पराजेरसोढः॥ ॥ पराजेः सदर्थस्य जयतेः प्रयोगे यो सोढुं न शक्नोति तत्कारकमपादानसंज्ञं भवति। अध्ययनात्पराजयते। असोढ इ
ति किं। शत्रून्पराजयते॥ वारणार्थानामीप्सितः॥ ॥ वारणार्था ये धातवस्तेषां प्रयोगे य ईप्सितोर्थः तत्कारकमपादानसंज्ञं भवति।
प्रवृत्तिविघातो वारणं। यवेभ्यो गां वारयति। यवेभ्यो गां निवर्त्तयति। ईप्सित इति किं। यवेभ्यो गां वारयति क्षेत्रे १५ ॥ ॥
त्वस्येतदभिप्रेतः यवानामीप्सितत्वं परकीयत्वं वा गमयति तन्मात्रमस्य वाचा वाचे मात्राणां नान्या वा मी ईप्सिताः न चात्र विशेषः कृतः कर्तुरीप्सित इति
हि तर्हि न स्यात्। अगोमीत्यादिकं वायं पतिक्रूपाद धर्ममिति न चाग्निकूपोवा पितुर्वाचमात्रस्य नाभिप्रेतो किंपाशस्य तु ग्रहणो वा वर्जमात्रस्यांधार
मिना हि किंचपाकूपादेरप्यमानत्वा रहितसिध्येति। अंध यात्पयपन् अपिप्रांतर्जिता मिषति अप्रयानकृ ईप्सितस्य प्रवृत्तिः स्यात् यवेभ्यो गां वारयति
वास्ज आवरणो कुहरि। अथात्रावाम यादानं संज्ञा कस्मान्न भवति ईप्सिततमो यो ईप्सितो भवत्येव। यथा गुरुत्वमो पितृत्व पत्वात्कर्मसंज्ञा न भविष्यति।
कर्मसंज्ञाया अवकाशः पापाद्ये भ्यो न्यत्र अपादानसंज्ञायास्तु पचकत्तरि हितं ईप्सिततमस्यात्र यपसंज्ञो परत्वात् कर्मसंज्ञा। अपममपि पर्ववः अति हि
अपि तु द्वि वा किंतो पापः कथ्येपरस्पर पयं यदि गावः क्षेत्रे गच्छेयुः एवं सस्यविनाशः सस्यविनाशे अधर्मः स्वराजभयं च। स्वबुध्या पापान्निवर्त्तयति

१४९
एम०

॥ ॥ अन्तर्द्धौ। अन्तर्धिरिति तिरोधानं निमित्तात्कर्मसंयोगादिति सप्तमी। यथा हि वेतनेन धान्यं लुनातीत्यत्र वेतनस्य धान्येन योगो नास्ति तथेहापि दर्शन
मिच्छतीति द्रष्टुः कर्मणा अदर्शनेनान्तर्द्धेर्योगो नास्ति। अथवा दर्शनस्य यत्कर्म आत्मा आत्मनो ऽदर्शनमिच्छतीति नीतर्द्धेर्योगोऽस्ति यस्मैवा
दर्शनं तस्यैवान्तर्द्धिनिमित्तत्वेनैतदपि निमित्तात् षष्ठ्यते। कारणं प्रयोजनं वा कारणं चेत्ता अभिनवर्द्धः अन्तर्धिमापयतेऽति यस्यैव व्यतेनान्तेद्वत्ता अमिति
तस्मात्प्रयोजनस्यात्तत्र ग्रहणं यथा चर्मणि द्वीपिनं हन्तीति चर्मद्वीपि हननस्य प्रयोजनं तद्वदन्तर्द्धिर्दर्शनस्य कारणं अन्तर्हितः खल्वसौ
न दृश्यते तस्माद्धिषयस्य मन्येषामन्तप्रमीवायेनेति कर्त्री (ति) तीया न नुवा दर्शनमिच्छन्निर्नयोगात्क कर्तृकर्मणोः कृतीति षष्ठ्या भाव्यं अप्रयत्नाले

॥ अन्तर्द्धौ येनादर्शनमिच्छति। यव धानमन्तर्द्धिः। अन्तर्द्धिनिमित्तं येनादर्शनं आत्मनः इच्छतीति तत्कारकमपादानसंज्ञं भवति। उपा
ध्यायादन्तर्द्धत्ते उपाध्यायान्निलीयते मातामातुर्पाध्यायो द्राक्षीदिति निलीयते। अन्तर्द्धीति किं॥ ॥ ॥ ॥

कर्मण्येवेति नियमात्तृतीया भविष्यति कर्मत्वात्तदर्शनस्यात्मानः वा त्मनेरतिन ग्रयजेमाभ्याविपेनादर्शनमिच्छतीत्युक्ते कस्लेत्यपेक्षायां
आत्मनस्त्रियाम्यते। अन्तर्द्धिनिमित्तमिति। अन्तर्धिनाकारणेनेत्यर्थः। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति प्रथमा अथवा अ
द्वर्ध्वीहिः अदर्शनस्य समानाधिकरणं विशेषणं। कुत्रेनुपातो यित छत्रो यन्त्रो निलसंबंधाल्लभ्यत एवे त्याहृत त्कार कमिति। अन्त
र्द्धनरति तिरोभवतीत्यर्थः। निलीयतइति लीङ् श्लेषणे दैवादिकः॥ ॥ श्री एम एम ॥ ~ ॥ ॥

का० १।४।२९
१५०

चौरान्न दिदृक्षत इति। आत्मानं तेमा द्राक्षुरितीत्येवमर्थं ननुपात्तात्कर्मसंज्ञा भविष्यति। सत्यं। अयमपि यर्थः। कथं यस्मात्तयं पुपाध्यायः पश्येत्तत्क्षणं चैवमेव प्रणामसुपालम्भो वा भवेदिति तिस्त्र बुद्ध्या यं प्राप्य निवर्त्तते येनेत्यस्मिन्नसति अदर्शनमिच्छत। शिष्यस्यैव स्यात्। ध्रुवमित्यनुवर्त्तिष्यते एवं तर्हि सूत्रस्यावाचकत्वं मा भूत् अस्मत्तिहितस्मिन्नसतद्वै ध्रुवमपादानसंज्ञं भवति तद्वै ध्रुवमदर्शनमिच्छतीत्ययमर्थः स्यात् न च ध्रुवमिच्छतिप्रच्छेच्छाति न तद्ध्रुवमिति अवाचकं स्यात्। आख्या॥ नियमपूर्वकं विद्याग्रहणमिति तन्नैवोपयोगाशब्दस्तूरत्वात्। यथा तेषां मंत्राणामुपयोगो दशाहमधःशय्येति नियमो भित्त्वा वरणादिनु एतेष्वणे नाज्ञि किं पुनरत्र रिक्ता कं उताहो न पादिका। कंकमित्तं त्रामामो ति अकथितं चेति अथाकाङ्क्षं उपयोगग्रहणमनर्थकं आत्तत्काकं नसुपाध्यायात्र एतस्माण्यो केशिद्दन्तो विशेषः

चौरान्न दिदृक्षते। इच्छतिग्रहणं किं। अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्॥ ॥ आख्यातोपयोगे॥ ॥ आख्याता प्रतिपादयिता उपयोगो नियमपूर्वकं विद्याग्रहणं॥ उपयोगे साध्ये य आख्याता तत्कारकमपादानसंज्ञं भवति। उपाध्यायादधीते। उपाध्यायादागमयति। उपयोग इति किं। नटस्य शृणोति॥ २९॥ ॥ ॥

अमत्ततो नियमात्। दुग्धादिपरिग्रहणेनान्तु कर्मसंज्ञा न भवति क्वचित्तु न स्याध्यायं शृणोतीत्ययं पकस्तकथां शृणोतीति पाठः तत्रापि नयादिनिमित्तं गाथादेः श्रवणं करोतीत्यर्थः ननु गाथादिविशेषणं नटादिः अकारकत्वप्रसङ्गात्। तत्रापि कः कथ्यापयो वाचयिता अयमपि प्रयोगः कथं उपाध्यायादिनिस्सरं तं शब्दं गृह्णातीति सूत्र एव आपायः इदं तर्हि प्रयोजनं उपयोग इति वृत्त्यामिन नटस्य माभूदिति। ननु नटस्य प्रत्ययावधित्वे शेषत्वे पेण विवक्षणात् षष्ठी भविष्यति यथा न मातापितृभ्रा भ्रामस्त्रीयादिति वक्तव्यन कर्मत्वे यमाषाणासतां सत्य एव विवक्षा नियमः सत्तकारणं प्रदर्शयति। उपयोगे अवधित्वं विवक्षयमन्यत्र शेषत्वमिति॥ ॥ २९॥ ॥ ॥ ॥

१५०
एम०

।जनिकर्त्तुः। जनेः कर्त्ता जनिकर्त्तेति कर्म्मणि षष्ठ्याः समासः अयमेव च निर्द्देशो ज्ञापयति कर्त्तरि चेति प्रतिषेधानित्य इति कः पुनरेतद्विज्ञायते आ
हा। जन्यर्थस्येति एतदुक्तं भवति। जनिशब्दो पमित्रजादिभ्य इति जने र्भावे इञ् तुमर्थाद्युक्तादितः जनिवध्योश्चेति वृद्धिप्रतिषेधः। जन्यर्थवाचीन
श्चिकल्पितो धातुनिर्द्देश इति इत्तः प्रसङ्गः। गमहनेत्युपधालोपप्रसङ्गात्। नाप्यनुके नैकारेण धातोर्निर्द्देशः। शब्दात्मकस्य धातोः कर्त्तासंबं
धायोगात्। अथ यद्येकोशोऽसतः एवमपि धातुनिर्द्देशे तस्य प्रयोगात् न पर्यायस्य श्रोतव्यां तत्त्वं भावती तिरर्थग्रहणे तत्रापि भवतीति
मकृति। तस्य विवरणं कारणमिति उपादानकारणमित्यर्थः। अमेतु प्रकृतिग्रहणानुवृत्ते एवं प्रकृतिपरिग्रहे सिद्धे प्रकृतिग्रहणं कारणमात्रपरि
ग्रहार्थं वर्णयन्ति। अत एव च तात्र वृत्तिकारः कारणमिति न पुनरुपादानकारणमिति तेन पुत्रात्प्रमोदो जायत इत्यत्रापि भवतीति किं पुनः सतो जाय
ते उताहो नन्वसतः। जन्मवैयर्थ्यात् नापूर्वे जन्मनः प्राप्तो ऽसतः किं जन्मना अथैवमपि जन्मनः पूर्वं जायस्वेत्येव घटो जायेत नाप्यसतः असतः क
र्तृत्वायोगात् शशविषाणादेरपि जन्मप्रसङ्गात् तदुक्तमत्र पूर्वावस्थाम विजहत्सत्त्वं शब्दः कर्म्मणुत्तरं संमूर्च्छितदवार्थजिव्यत्पमानोऽभिधीयत
॥जनिकर्त्तुः प्रकृतिः। जनेः कर्त्ता जनिकर्त्ता। जन्यर्थस्य जन्मनः कर्त्ता जायमानः तस्य या प्रकृतिः कारणं हेतुः। तदपादानसंज्ञं भवति
।शृङ्गाच्छरो जायते गोमयाद्वृश्चिको जायते॥ ॥भुवः प्रभवः। कर्त्तृ इति वर्त्तते। भवनं भूः। भवनमस्मादिति प्रभवः। भूकर्त्तुः प्र
भवो ऽपत्यस्य कारकमपादानसंज्ञं भवति। हिमवतो गङ्गा प्रभवति। कश्मीरेभ्यो वितस्ता प्रभवति। प्रथमत उपलभ्यत इत्यर्थः॥ ॥
इति एतत्त्वान्महतः रसत्रीपपादयिष्यामः। किं चास्माकमनेनदृष्टान्तेन अस्ति तावच्छृङ्गाच्छरो जायत इति प्रयोगः। स उपपादनीयः स तावदयमपि
प्रपञ्चः। लोके हि पयसो दध्यो जायत इति तत्ततोऽवच्छितीस्यते। लोकप्रसिद्ध्यनुसारेण शब्दप्रयोगः। अर्थतात्त्वं तु तथा भवतु मा वा। भुवः प्रभवः।
भवनं भूः। संपदादित्वात्क्विप्। अन्यापि प्रशब्दोऽस्त्येवमस्य। न हि केवलस्य भुवः सर्वस्य भवनेन योगः। किंतर्हि ह्योपसर्गस्य भवः कर्त्ता भवतस्यर्थस्य
कर्त्तेत्यर्थः। भुवो वा धातोः कर्त्ता कथं पुनर्धातोर्नमिकर्त्ता स्यात् धातुवैशब्दः शब्दे असंभवात्कार्थकार्यवित्तासतेन तदुपपत्तेर्भावेनकः विगततत्ता
वितस्तेति अशोक्ष्मत्यर्थः। प्रथमत उपलभ्यत इति उपलभतेः कर्म्मव्यापारे प्रभवतिः। प्रवर्त्तत इत्यर्थः। प्रकाशत इति पाव इत्येते न जन्मणो बाधदन्
नामास्मित्वर्थे इन्तिः। अयमपि प्रपञ्चः। कथं भवन् पूर्वके निःसरणेऽम भवतिर्वर्त्तते॥ ॥ ॥ ॥ ॥

का॰ १९॰ १३ १५१

ककर्म्मणा। कर्म्मणाभूतेनेति। कथं पुनः कर्म्म करणं भवति। क्रियाभेदात्। दानक्रियायां कर्म्माभिप्रापणक्रियायां करणं। दीयमा
नया हि गवा ब्राह्मणमुपाध्यायमभिप्रैतीति संबध्यते। ईप्सिततमत्वं अभिप्रपूर्वो हि णीञ् ईप्सतिना समानार्थः। अभिप्रैतमित्युक्ते ईप्सिततममिति गम्यते। उक्तं च।
अनिराकरणात्कर्तुः त्यागाङ्गं कर्म्मणेप्सितं। प्रेरणानुमतिभ्यां वा लभते संप्रदानतां। त्यागाङ्गं शेषभूतं कर्म्मणा। दिनेप्सितं। अनुमितं संप्रदानतां लभते
अनिराकरणाद्वा एवमाह्। तिरनुमनाद्वा। देवेभ्यः सुमनसो ददातीयावकाय भिक्षां ददाति। णाभ्यां पायगां ददाति। ननु निराकृतं। नेति संप्रदानं भवतीति श्लो
कार्थः। अत्र केचिदाहुः कुरातिप्रादपदस्तत्र वार्तिकं उदात्तवतातिङा गतिः समासवचनमिति। योऽन्यो तदेवप्र्य्यभूषतपः शं वा। विलमदतः। पस्मान्नघोते

कर्म्मणायमभिप्रैति स संप्रदानं॥ कर्म्मणाकरणभूतेन कर्त्ता यमर्थमभिप्रैति तत्कारकं संप्रदानसंज्ञं भवति॥ ॥१३॥

विजयन्ते योवैप्रजवं पताममप्रयेनमतिपद्यते। द्त्वा धुद्राह हरणानि। अत्रसर्वत्र पश्न्नान्मितमिति निपातमतिषेधात्। तिङ्‌त्तमुदात्तवत्तत्तथ्य
मभिप्रैतीत्यत्रापेसमासे सतिप्रातिपदिकत्वात् विभक्तुसातिंसादिति वर्यतस्छेदो। विषपन्नातापदिकस्मेणायग्रभिप्रैतीति संप्रदानं अजां नयतिग्रा
मतीति अजैन्नयति। क्रियाकर्म्मभिः संबध्यमानस्य ग्रामस्य संप्रदानता प्राप्नोति। नप्राप्नोति। किं कारणं। कर्मणेति करणोक्तौ यत्तु क्तनवमथा। शिष्यसोपा
ध्यायसंबंधेगोकः रणः। एवं अजाः ग्राममं बचे। ईप्सतिनासनार्थे अनुतमप्राप्तिः। तथा हियमाभिप्रैतोत्तुक्तय मिति दिंषस्य शेषित्वे कर्म्मणेति नेदि
हसगवादेः करणत्वं शेषत्वं च प्रतीयते यथा कश्चिभिप्रेत्य क्रियाफलं इति कर्तुः शेषित्वे क्रियाफलस्य शेषत्वं न चात्र शेषशेषिभावः प्रतीयते किंचना
वस्तोर्हेतेस्थापीतिद्विकर्म्मतिद्विकस्मके युनयतिः प्रीणयतो ऽपि ग्रामस्य नानमविच्छाति १३ ॥ ॥ ॥ ॥

१५१

। अथ किमर्थं महती संज्ञा। क्रियत इत्याह। अन्वर्थसंज्ञाविज्ञानादिति। ईप्सितमाद्यीप्सितेष्वेतत्संप्रत्ययः नमिसन्त्वर्थत्वात् संज्ञायाः इत्याह इति कर्मणा यम
भिप्रैति स सम्प्रदानमित्यर्थः एवमपि जकस्यैव स्यु इत्याह इति यतः इ इ इत्याजीसत्र कस्मान्न भवति अत आह न त्वात् किं पुनर्न्ने नं किं। विरुद्धि इत्यमुनर्म हणं
यथः स्वदृष्टमसमोः यथा वस्त्रायजलं इत्यार्तिदेवेभ्यः हुतमनमः पाचकाय लिप्तामुपाध्यायाय गां ददाति कोपाध्यायस्यैव पेटिकां ददाति। नमूद्गायेप्सि
अभिप्रेतमतिं इयादिति। कतल महार म्रूपेटिकाजके नुपुनर्ग्रहणं हा ... नाभाव उपमाना त्तु इत्याह इति मयो। तेनकार कशेषात्वान्न इत्यप्र
णीतीति वत्यष्ठी। कर्मणेति किं यावता उपाध्यायाय इत्यत्रा मेत्रणीतुपाध्यायस्यैवाभिप्रेयमाणत्वे यतो गौर्हिनक्रियया कर्मणाऽत्यन्ताभिप्रेय
त्वादुपाध्यायः तत्र परत्वात्कर्मसंज्ञेति पा। र्णोष्मात् उपाध्याय स्वैव संप्रदानसंज्ञा भविष्यति। नेत्यस्ति। हसम्यु भयो। अभिप्रेयमाण
त्वे अंतरंगात्वात् कर्मण एव स्याद्वहिः स्याक्तकर्मसंज्ञात्तु इत्याह इति कर्मणो मम ... त्वकारण ... कर्मकरणीभमककैनाभ्यपते। अन्तरंगा वहि
रंगाभावोपि पुनर्ग्रहणे अक्रियमाणे अभिप्रेत्वेव संप्रदानसंज्ञा स्यात्। अनुतपदार्थस्यैवधेनैव निर्णकांतत्वाद ध्याहारानुपपत्तेः सम

॥ अन्वर्थसंज्ञाविज्ञानादिति कर्मणेति विज्ञायते। उपाध्यायाय गां ददाति। माणवकाय भिक्षां ददाति। क्रियाग्रहणमपि कर्त्तव्यं

पिवाध्याहारं यः मरस्याध्याहारेण ततः उपाध्यायायाशिष्येण गौरीप्सितः इति। अत्रार्थे शिष्यस्योपाध्यायस्य गौरीप्सितः इति स्यात्। कर्मसंज्ञायां हि
कर्तृग्रहणं स्यात्तं श्रोपलक्षणं तेन शिष्यस्य कर्तृत्वाभावेपि गौः कर्मसंज्ञा पुनस्तत एव। तथा च सार्थाद्वीप्सित इति कर्मणि लकारेण तत्र अभिप्र
ग्रहणं किं यावता कर्मणा यमेति गच्छति संबध्यातीत्यर्थः। अभीप्रेतीत्युक्ते स एव। अभिप्रग्रहणे अक्रियमाणे कालविवक्षा स्यात् ततस्त्वय
मेव संप्रत्येति तत्रैव स्यात्। यमाणात्पंचैष्यतितत्र न स्यात्। अभिप्रग्रहणे पुनः क्रियमाणे न दोषो भवति अभिराभिमुख्ये वर्त्तते प्रशब्दस्त्वादिक
र्मणि तत्र श्रोपसर्गद्वयोपादानसामर्थ्यात्कालावच्छिन्ना क्रियमाना अभ्युपेते। ननु यथा तेन हीप्सतीमान्येभ्यां कालयोः। विवक्षातथेहापि संख्या
व्कालस्याप्य विवक्षा सिद्धा। सत्यं। अयमेव त्वा यमिहोर्थउपसर्गद्वयोपादानेन प्रदर्श्यते। यदात्व भिप्रेतीत्यस्य ईप्सतीत्यर्थस्तदाभिग्रह
णं कर्त्तव्यमेव क्रियाग्रहणमपि कर्त्तव्यमितिवार्त्तिकं॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ २ ॥ २ ॥

एतच्चावश्यं क्रियपेत्याहि । ननु क्रियामपि धर्म्यमभिप्रैति स संप्रदानं । आह । इह लोके कर्मत्युपचरंति किं कर्म करिष्यसि । कां क्रियामिति । तत्र कर्मणा यमभि प्रैतीत्येव सिद्धं । एवमपि कर्त्तव्यं कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भवति संप्रदर्शनप्रार्थनाध्यवसायैराप्यमानत्वात् क्रियापि कृत्रिमं कर्म । तथा हि य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुध्या तावत्कंचिदर्थं संपश्यति । दृष्टे मीदृशं तितं दृष्टं प्रार्थयते । अपि मम स्यादिदं स्यादिति ततः तदुपायभूतां क्रियां संपश्यति । असा एतत्फलमिति । ततः प्रार्थयते कथमियं निष्पद्यतामिति ततः तत्साधनानि समवधार्य कर्तुमध्यवस्यति । प्रतीयमानक्रियायां स्त्रीत्योपिकारकभावो भवत्येव यथा प्रविशपिंडीमित्यत्र भक्षयेति गम्यते । सूत्रकारस्य तत्र यतिक्रियार्थोपपदस्य च कर्मणि स्थानिन इति । एवमपि क्रियाग्रहणं कर्तव्यं । अददातिकर्मत्वात् । गत्व्हात इति नास्ति कान्विंदतीत्यर्थः । आहिंगत्व्ह कुत्सायामनुदात्तेश्यु द्धा येति युद्ध विषयं संनाहं पश्यति निश्चयं करोतीत्यर्थः । नद्यतिः स्वरितेत् । पमेशोन इति पतितस्य यस्तत्मर्शो तदित्यर्थः । परितहिं क्रियया अभिप्रैयमाणस्याभिभवतिकरं करोतीत्यादाव तिप्रसज्यते । वचनाद्धि कर्मसं

क्रियया पियमभिप्रैति स संप्रदानं । श्राद्धाय निगर्हते युद्धाय संनह्यते पत्ये शेते । संप्रदानप्रदेशाः चतुर्थी संप्रदाने इत्येवमादयः । कर्मणः करणः करणसंज्ञावकव्या संप्रदानस्य च कर्मसंज्ञा पशुना रुद्रं यजते । पशुं रुद्राय ददातीत्यर्थः ॥ १८ ॥ ॥ ॥ ॥

प्रदानसंज्ञयोः पर्यायः स्यात् । नैतत्सार्वत्रिकं किं तर्हि मयोस्य दर्शनवशेन नियतविषयं । कर्मणः करणसंज्ञा स्यात् । एतच्छंदो विषयं । सर्वे विधयश्छंदसि विकल्पंत इति यथा प्राप्तमपि प्रयोगो भवति । भाष्येन्तु ददातिकर्मणो स्तिना भितं प्रयोगाश्च बहवः अर्पयस्वेवहूं निर्वपेत् । पतद्देवेभ्यो वस्तो दत्तं समवत्तं देवेभ्यो हव्यं वहान: । छंदांसि वै देवेभ्यो हव्यमूहुः । पयाद दाशुषे राजानः कर स्पर्वतेस्मादयः तन्मते क्रियाग्रहणं न कर्त्तव्यं कथं पत्ये शेते संप्रदानत्वमिष्यते । तत्र संदर्शनादीनां क्रियायाश्च भेदो विवक्ष्यते । ततश्चैतैराप्यमानाक्रियापि कृत्रिमं कर्मेति सिद्धं तया निप्रेयमाणस्य संप्रदानत्वं यत्र तु नेष्यते । तत्र भेदो न विवक्ष्यते । ततश्चौदनादिकर्म्मणा वच्छेदेनैकी कृतया क्रियया व्याप्यमानस्य कर्म्मत्वमेव भविष्यति । क अंको प्रस्थौदनं पचतीति गामस्येयुत्तमपं विवक्ष्यते नेहो भेदश्च भेदविवक्षायां ग्रामायाग्राछतिः अभेदविवक्षायां ग्रामं गच्छतीति प्रयोगादिति । तमर्थकर्मणी न्येन इति नवक्तव्यं भवति ॥ १८ ॥ ॥ ॥ ॥

।रुच्यर्थानां॥ रुचिना समानार्थो इति। वस्तुकथनमेतत्। विग्रहस्तु रुचिरर्थो येषामिति। ते च तु विना धातुना समानार्था भवंति। प्रीयमाण इति प्रीञ् तर्प्प
णे इत्यस्मात्सकर्म्मकात्कर्म्मणि। न तु द्वैवादिकस्य रि इ कर्मकः। तत्प्रीयमाण इत्यर्थः। अन्यकर्तृक इति। यो भिलाषस्याश्रयः प्रीयमाणः ततोन्यकर्तृक इत्यर्थः। क
थं पुनरस्याश्रयस्याभिलाषस्याश्रयः कर्त्ता भवति यावता पदार्थ अपव्यापारं धातु। मा धात्मेनाचष्टे तत्कर्त्ता निर्द्दिष्टं कर्तृत्वं लक्षणं किं तु स्वातंत्र्यमेव। तच्चास्य अविद्यमानत्वं
कथं देवदत्तस्य माधुर्यातिशयेन स्वविषयं देवदत्ताश्रयं अभिलाषं जनयन्मोदकः तत्र कर्त्ते त्यर्थापयते। न चैवं लक्षणेपि प्रसंगः देवदत्तो मोदकमभिलष्य
तीति। अभिधानशक्तिवैचित्र्यात्। आश्रयकर्तृको भिलाषो लक्ष्यते वा। अथ च एव विषयकर्तृकः इह चाश्रयमभिधानप्रकारनियमो न्यत्रापि। तथा यथा घटः प्र
काशत इति विषयकर्तृकं ज्ञानं वाच्यं घटः प्रकाशत इत्यत्र प्रकाशो विषयकर्तृकं विषय एव हि सच्छालोकान् ध्ववर्त्तित्वादिनाहो कर्पेण देवदत्ताश्रये

॥रुच्यर्थानां प्रीयमाणः॥ रुचिना समानार्थो रुच्यर्थः। अन्यकर्तृको भिलाषो रुचिः। रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो योर्थ
स्तत्कारकं संप्रदानसंज्ञं भवति। देवदत्ताय रोचते मोदकः। यज्ञदत्ताय स्वदते अपूपः। देवदत्तस्य स्वस्याभिलाषस्य मोदकः कर्त्ता प्रीय
माण इति किं। देवदत्ताय रोचते मोदकः पथि॥ ॥

ता नेकर्त्तेति व्यपदिश्यते। न तु तान नकश्चिदतिशयो विषयेषु जनयति प्रकाशो नाम यं प्राक् घमाचहते भाव्यास्तत्र का एकशेषत्वेन षष्ठीप्रसंगो वचनं
। अन्ये तु प्रीयमाणं देवदत्तं मोदकः प्रीणातीति कर्म्मसंज्ञाप्रसंगमाशंक्य अपरे त्वेव मादुः देवदत्तो रोचयति मोदकमिति हेतुत्वे प्राप्ते वचनमिति देव
दत्तं हि प्राप्य रोचते मोदकः। न स्वयं। न नेकत्र त्वयोर्हि प्राणिनः इति। एवमुत्तरे षपि योगेषु द्रष्टव्यं। उक्तं च। हेतुत्वे कर्म्मसंज्ञायां प्राप्ते त्वेकापिका रुच्यर्था
दिषु शास्त्रेण संप्रदानाख्यमुच्यत इति। पथ्यीति। हेतुकर्म्मसंज्ञाबाध्येतेति भावः। किं च प्रीयमाणग्रहणं एकादिस्मो रोचत इति दीसिवा विनामग्रहणं
श्रीरामचंद्राय नमः ॥ श्रीराम ॥

॥

का॰ १६॰ १६
१५३

श्लाघ॥ ॥ ज्ञीप्स्यमान इति। माणतो षणान्निशामने घुन्त्राइ निपदा दिघुध्यात्वेण संक्षिप्यते। तस्मान्निशामनेर्थे हेतुमणि विसमापृतपाधामीतन्त्र
त्वलोयोभ्यासस्य कर्मणि लटः शानजादेशः। निशामनं चेह ज्ञानमात्रमुच्यते। न बुद्धि विज्ञानमेव। पदाहबोधयितुमभिप्रेतेति। कथं तर्हि प्रयुज्यते तत्र
न्यपपत्त्याचार्यः विज्ञापनात् नंघुक्ति द्धिमेती तितस्मान्निशाने घितिपाठः शोजनूकारणे। स्तुउंतः स्मंज्ञपितः पश्चुरिस्तु दाहरणं। ज्ञीप्स्यमानो ज्ञपयितुमि
ष्यमाण इति प्रयोगो ज्ञपयितुमिष्टे तिघुणादिणि ज्ञं तस्य अन्ये तु मितां ह्रस्व इत्यत्र वा चिन्नविणाइत्यतो चेत्यनुवर्त्तेर्ज्ञ व्यवस्थित विभाषाविज्ञानाज्ज्ञानिष्टे वि
षये ह्रस्वाभावमाहुः। देवदत्तं प्रति श्लाघमानः तां श्लाघां तमेव ज्ञापयितुमिच्छतीत्यर्थ इति। श्लाघा त्वत्र निःम्पष्ठेण देवदत्तं स्तौतीति भावतः एवं
हितां देवदत्तः शक्नते ज्ञापयितुं अन्ये त्वाहुः। देवदत्तायात्मानं परं वा श्लाघं कथयतीत्यर्थ इति। तथा च भट्टिः क्रमं श्लाघमानः परस्त्रीभ्यः तत्रा
गाद्राक्षसाधिप इति। आत्मानं श्लाघ्यं परस्त्रीभ्यः कथयन्नित्यर्थः। एवं देवदत्ताय निह्नुत इति ह्नुङ् अपनये देवदत्तं प्रति निह्नुवानः तां निह्नुतिं त

श्लाघ ह्नुङ् स्थाशपां ज्ञीप्स्यमानः। श्लाघ ह्नुङ् स्था शप इत्येतेषां ज्ञीप्स्यमानो योऽर्थस्तत्कारकं संप्रदानसंज्ञं भवति। ज्ञीप्स्यमानो ज्ञप
यितुमिष्यमाणोऽवबोधयितुमभिप्रेतः। देवदत्ताय श्लाघते। देवदत्तं श्लाघमानः तां श्लाघां तमेव ज्ञापयितुमिच्छतीत्यर्थः। एवं देवदत्ता
य ह्नुते। यज्ञदत्ताय ह्नुते। देवदत्ताय तिष्ठते। यज्ञदत्ताय तिष्ठते। देवदत्ताय शपते। यज्ञदत्ताय शपते। ज्ञीप्स्यमान इति किं। देवदत्ताय श्लाघते

मेव तमपितुमिच्छतीत्यर्थः। इत्येष एवं शब्दस्यार्थः निह्नुतिरपलापः। संनिहितं देवदत्तं धनिकादेः अपलपतीत्यर्थः। एवं देवदत्ताय निह्नुत इति ह्नुङ्
अपनये देवदत्तं प्रति निह्नुवानः तां निह्नुतिं तमेव ज्ञापयितुमिच्छतीत्यर्थः। इत्येष एवं शब्दस्यार्थः। निह्नुतिरपलापः। संनिहितं देवदत्तं धनिकादेः
अपलपतीत्यर्थः। अन्ये तु ह्नौ तम्मां किंचिद्देवदत्तं ज्ञापयतीत्यर्थ इत्याहुः। देवदत्ताय तिष्ठत इति ईदृशोऽहमिति देवदत्तस्य स्थानेन प्रकाशयतीत्यर्थः।
देवदत्ताय शपत इति। शपथेन किंचित्प्रकाशयतीत्यर्थः। देवदत्तः श्लाघत इति। ज्ञीप्स्यमानवचनात् कर्मसंज्ञेव बाध्यते न कर्तृसंज्ञेत्यर्थः। एवंगाति
कयाः श्लाघते सम्भाष्या मितिकरणाधिकरणसंज्ञेन वाध्यते क्वचित् रू देवदत्तेन श्लाघत इति पाठः। तत्रायं भावः। यस्मापाख्यापते सज्ञीप्स्यमान इत्या
